# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती(अष्टम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ अष्टमोऽध्यायः ॥

। ध्यानम् ।

ॐ अरुणां(ङ्) करुणातरङ्गिताक्षीं(न्),

धृतपाशाङ्कुशबाणचापहस्ताम् ।

अणिमादिभिरावृतां(म्) मयूखै-

रहमित्येव विभावये भवानीम् ॥

ॐ ऋषिरुवाच ॥ 1॥

चण्डे च निहते दैत्ये, मुण्डे च विनिपातिते ।

बहुलेषु च सैन्येषु, क्षयितेष्वसुरेश्वरः ॥ 2॥

ततः(ख्) कोपपराधीन- चेताः(श्) शुम्भः(फ्) प्रतापवान् ।

उद्योगं(म्) सर्वसैन्यानां(न्), दैत्यानामादिदेश ह ॥ 3॥

अद्य सर्वबलैर्दैत्याः(ष्), षडशीतिरुदायुधाः ।
कम्बूनां(ञ्) चतुरशीतिर्- निर्यान्तु स्वबलैर्वृताः ॥ 4॥

कोटिवीर्याणि पञ्चाश- दसुराणां(ङ्) कुलानि वै ।
शतं(ङ्) कुलानि धौम्राणां(न्), निर्गच्छन्तु ममाज्ञया ॥ 5॥

कालका दौर्हृदा मौर्याः(ख्), कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु, आज्ञया त्वरिता मम ॥ 6॥

इत्याज्ञाप्यासुरपतिः(श्), शुम्भो भैरवशासनः ।
निर्जगाम महासैन्य- सहस्रैर्बहुभिर्वृतः ॥ 7॥

आयान्तं(ञ्) चण्डिका दृष्ट्वा, तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः(फ्) पूरयामास धरणीगगनान्तरम् ॥ 8॥

ततः(स्) सिं(म्)हो महानाद- मतीव कृतवान् नृप ।
घण्टास्वनेन तान्नाद- मम्बिका चोपबृं(म्)हयत् ॥ 9॥

धनुर्ज्यासिं(म्)हघण्टानां(न्), नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः(ख्) काली, जिग्ये विस्तारितानना ॥ 10॥

तं(न्) निनादमुपश्रुत्य, दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिं(म्)हस्तथा काली, सरोषैः(फ्) परिवारिता: ॥ 11॥

एतस्मिन्नन्तरे भूप, विनाशाय सुरद्विषाम् ।
भवायामरसिं(म्)हाना-मतिवीर्यबलान्विताः ॥ 12॥

ब्रह्मेशगुहविष्णूनां(न्), तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य, तद्रूपैश्चण्डिकां(यँ) ययुः ॥ 13॥

यस्य देवस्य यद्रूपं(यँ), यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्ति- रसुरान् योद्धुमाययौ ॥ 14॥

हं(म्)सयुक्तविमानाग्रे, साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः(श्) शक्तिर्-ब्रह्माणी साभिधीयते ॥ 15॥

माहेश्वरी वृषारूढा, त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता, चन्द्ररेखाविभूषणा ॥ 16॥

कौमारी शक्तिहस्ता च, मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्या- नम्बिका गुहरूपिणी ॥ 17॥

तथैव वैष्णवी शक्तिर्-गरुडोपरि सं(म्)स्थिता ।
शङ्खचक्रगदाशार्ङ्ग- खड्गहस्ताभ्युपाययौ ॥ 18॥

यज्ञवाराहमतुलं(म्), रूपं(यँ) या बिभ्रतो हरेः ।
शक्तिः(स्) साप्याययौ तत्र, वाराहीं(म्) बिभ्रती तनुम् ॥ 19॥

नारसिं(म्)ही नृसिं(म्)हस्य, बिभ्रती सदृशं(वृँ) वपुः ।
प्राप्ता तत्र सटाक्षेप- क्षिप्तनक्षत्रसं(म्)हतिः ॥ 20॥

वज्रहस्ता तथैवैन्द्री, गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना, यथा शक्रस्तथैव सा ॥ 21॥

ततः(फ्) परिवृतस्ताभि-रीशानो देवशक्तिभिः ।
हन्यन्तामसुराः(श्) शीघ्रं(म्), मम प्रीत्याऽऽह चण्डिकाम् ॥ 22॥

ततो देवीशरीरात्तु, विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा, शिवाशतनिनादिनी ॥ 23॥

सा चाह धूम्रजटिल- मीशानमपराजिता ।
दूत त्वं(ङ्) गच्छ भगवन्, पार्श्वं(म्) शुम्भनिशुम्भयोः ॥ 24॥

ब्रूहि शुम्भं(न्) निशुम्भं(ञ्) च, दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र, युद्धाय समुपस्थिताः ॥ 25॥

त्रैलोक्यमिन्द्रो लभतां(न्), देवाः(स्) सन्तु हविर्भुजः ।
यूयं(म्) प्रयात पातालं(यँ), यदि जीवितुमिच्छथ ॥ 26॥

बलावलेपादथ चेद्- भवन्तो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु, मच्छिवाः(फ्) पिशितेन वः ॥ 27॥

यतो नियुक्तो दौत्येन, तया देव्या शिवः(स्) स्वयम् ।
शिवदूतीति लोकेऽस्मिं(म्)स्-ततः(स्) सा ख्यातिमागता ॥ 28॥

तेऽपि श्रुत्वा वचो देव्याः(श्), शर्वाख्यातं(म्) महासुराः ।
अमर्षापूरिता जग्मुर्-यत्र कात्यायनी स्थिता ॥ 29॥

ततः(फ्) प्रथममेवाग्रे, शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्- तां(न्) देवीममरारयः ॥ 30॥

सा च तान् प्रहितान् बाणाञ्- छूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मात-धनुर्मुक्तैर्महेषुभिः ॥ 31॥

तस्याग्रतस्तथा काली, शूलपातविदारितान् ।
खट्वाङ्गपोथितां(म्)श्चारीन्, कुर्वती व्यचरत्तदा ॥ 32॥

कमण्डलुजलाक्षेप- हतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून्, येन येन स्म धावति ॥ 33॥

माहेश्वरी त्रिशूलेन, तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी, तथा शक्त्यातिकोपना ॥ 34॥

ऐन्द्रीकुलिशपातेन, शतशो दैत्यदानवाः ।
पेतुर्विदारिताः(फ्) पृथ्व्यां(म्), रुधिरौघप्रवर्षिणः ॥ 35॥

तुण्डप्रहारविध्वस्ता, दं(म्)ष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतं(म्)श्- चक्रेण च विदारिताः ॥ 36॥

नखैर्विदारितां(म्)श्चान्यान्, भक्षयन्ती महासुरान् ।
नारसिं(म्)ही चचाराजौ, नादापूर्णदिगम्बरा ॥ 37॥

चण्डाट्टहासैरसुराः(श्), शिवदूत्यभिदूषिताः ।
पेतुः(फ्) पृथिव्यां(म्) पतितां(म्)स्-तां(म्)श्चखादाथ सा तदा ॥ 38॥

इति मातृगणं(ङ्) क्रुद्धं(म्), मर्दयन्तं(म्) महासुरान् ।
दृष्ट्वाभ्युपायैर्विविधैर्- नेशुर्देवारिसैनिकाः ॥ 39॥

पलायनपरान् दृष्ट्वा, दैत्यान् मातृगणार्दितान् ।
योद्‌धुमभ्याययौ क्रुद्धो, रक्तबीजो महासुरः ॥ 40॥

रक्तबिन्दुर्यदा भूमौ, पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यां(न्), तत्प्रमाणस्तदासुरः ॥ 41॥

युयुधे स गदापाणि-रिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण, रक्तबीजमताडयत् ॥ 42॥

कुलिशेनाहतस्याशु, बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्-तद्रूपास्तत्पराक्रमाः ॥ 43॥

**यावन्तः(फ्) पतितास्तस्य, शरीराद्रक्तबिन्दवः ।**
**तावन्तः(फ्) पुरुषा जातास्- तद्वीर्यबलविक्रमाः ॥ 44॥**

**ते चापि युयुधुस्तत्र, पुरुषा रक्तसम्भवाः ।**
**समं(म्) मातृभिरत्युग्र- शस्त्रपातातिभीषणम् ॥ 45॥**

**पुनश्च वज्रपातेन, क्षतमस्य शिरो यदा ।**
**ववाह रक्तं(म्) पुरुषास्- ततो जाताः(स्) सहस्रशः ॥ 46॥**

**वैष्णवी समरे चैनं(ञ्), चक्रेणाभिजघान ह ।**
**गदया ताडयामास, ऐन्द्री तमसुरेश्वरम् ॥ 47॥**

**वैष्णवीचक्रभिन्नस्य, रुधिरस्रावसम्भवैः ।**
**सहस्रशो जगद्व्याप्तं(न्), तत्प्रमाणैर्महासुरैः ॥ 48॥**

**शक्त्या जघान कौमारी, वाराही च तथासिना ।**
**माहेश्वरी त्रिशूलेन, रक्तबीजं(म्) महासुरम् ॥ 49॥**

**स चापि गदया दैत्यः(स्), सर्वा एवाहनत् पृथक् ।**
**मातृः(ख्) कोपसमाविष्टो, रक्तबीजो महासुरः ॥ 50॥**

**तस्याहतस्य बहुधा, शक्तिशूलादिभिर्भुवि ।**
**पपात यो वै रक्तौघस्-तेनासञ्छतशोऽसुराः ॥ 51॥**

तैश्चासुरासृक्सम्भूतै-रसुरैः(स्) सकलं(ञ्) जगत् ।
व्याप्तमासीत्ततो देवा, भयमाजग्मुरुत्तमम् ॥ 52॥

तान् विषण्णान् सुरान् दृष्ट्वा, चण्डिका प्राह सत्वरा ।
उवाच कालीं(ञ्) चामुण्डे, विस्तीर्णं(वँ) वदनं(ङ्) कुरु ॥ 53॥

मच्छस्त्रपातसम्भूतान्, रक्तबिन्दून्महासुरान् ।
रक्तबिन्दोः(फ्) प्रतीच्छ त्वं(वँ), वक्त्रेणानेन वेगिना ॥ 54॥

भक्षयन्ती चर रणे, तदुत्पन्नान्महासुरान् ।
एवमेष क्षयं(न्) दैत्यः(ह्), क्षीणरक्तो गमिष्यति ॥ 55॥

भक्ष्यमाणास्त्वया चोग्रा, न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां(न्) ततो देवी, शूलेनाभिजघान तम् ॥ 56॥

मुखेन काली जगृहे, रक्तबीजस्य शोणितम् ।
ततोऽसावाजघानाथ, गदया तत्र चण्डिकाम् ॥ 57॥

न चास्या वेदनां(ञ्) चक्रे, गदापातोऽल्पिकामपि ।
तस्याहतस्य देहात्तु, बहु सुस्राव शोणितम् ॥ 58॥

यतस्ततस्तद्वक्त्रेण, चामुण्डा सम्प्रतीच्छति ।
मुखे समुद्गता येऽस्या, रक्तपातान्महासुराः ॥ 59॥

तां(म्)श्चखादाथ चामुण्डा, पपौ तस्य च शोणितम् ।
देवी शूलेन वज्रेण, बाणैरसिभिर्ऋष्टिभिः ॥ 60॥

जघान रक्तबीजं(न्) तं(ञ्), चामुण्डापीतशोणितम् ।
स पपात महीपृष्ठे, शस्त्रसङ्घसमाहतः ॥ 61॥

नीरक्तश्च महीपाल, रक्तबीजो महासुरः ।
ततस्ते हर्षमतुल-मवापुस्त्रिदशा नृप ॥ 62॥

तेषां(म्) मातृगणो जातो, ननर्तासृङ्गदोद्धतः ॥ 63॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥

उवाच 1, अर्धश्लोकः 1, श्लोकाः 61, एवम् 63 एवमादितः 502॥

